# आदर्शप्रश्नपत्रम-II ( 2024-25 )
## कक्षा-अष्टमी
## संस्कृतम्

**अवधिः - होरात्रयम्** **सम्पूर्णाङ्काः : 80**

***निर्देशा :***

* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।*
* *प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।*
* *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

---

### खण्डः - 'क' ( अपठित-अवबोधनम् ) 10 अङ्काः

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

वैदिकं साहित्यम् अतिविस्तृतम् अस्ति। वेदाः, उपवेदाः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदः च वैदिकसाहित्यस्य प्रमुखाः ग्रन्थाः सन्ति। एतेषु ग्रन्थेषु वैदिकविज्ञानस्य समृद्धपरम्परा विद्यते। अस्माकं ऋषयः गभीरं चिन्तनं महतीं साधनां च कृत्वा अनेकाः सिद्धीः प्राप्तवन्तः। तेषां तत् ज्ञानं सर्वेषां प्राणिनां कल्याणाय अस्ति। अतः ते विभिन्नग्रन्थान् अरचयन्। ते न केवलं ग्रन्थान् अरचयन् अपितु स्वतपोबलेन प्राणिनां कल्याणाय बहून् आविष्कारान् अपि अकुर्वन्। आधुनिकयुगे सर्वेषु क्षेत्रेषु अनेके आविष्काराः भवन्ति। तेषु आविष्कारेषु अनेकेषाम् आविष्काराणां मूलं वैदिकसाहित्ये अस्ति। वयं तेषां मूलानाम् अन्वेषणं कुर्याम। तेषाम् अनुसन्धानं च कृत्वा ऋषीणां ज्ञानविज्ञानस्य परम्परायाः महत्त्वं च अवगम्य वयं गौरवान्विताः भवेम। एवं भारतीयज्ञानविज्ञानं प्रति अस्माकं मनसि समादरभावः भविष्यति।

(अ) एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्) (1×2=2)

(i) ऋषीणां ज्ञानं केषां कल्याणाय अस्ति ?

(ii) अनेकेषाम् आविष्काराणां मूलं कस्मिन् अस्ति?

(iii) वैदिकं साहित्यं कीदृशम् अस्ति?

(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्) (2×2=4)

(i) वयं कथं गौरवान्विताः भवेम?

(ii) ऋषयः किं कृत्वा अनेकाः सिद्धीः प्राप्तवन्तः?

(iii) वैदिकविज्ञानस्य समृद्धपरम्परा कुत्र विद्यते?

(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। (1)

(ई) निर्देशानुसारम् उत्तरत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) 'सर्वेषु क्षेत्रेषु अनेके आविष्काराः भवन्ति।' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

(क) अनेके (ख) सर्वेषु (ग) भवन्ति (घ) क्षेत्रेषु

(ii) 'अस्माकं मनसि समादरभावः भविष्यति।' अत्र 'भविष्यति' इति क्रियापदस्य कर्ता कः?

(क) अस्माकम् (ख) समादरभावः (ग) भविष्यति (घ) मनसि

(iii) 'वैदिकम्' इति पदस्य विशेष्यपदं गद्यांशे किम् अस्ति?

(क) साहित्यम् (ख) वेदाः (ग) अति (घ) अस्ति

(iv) 'ज्ञात्वा' इति अर्थे गद्यांशे किं पदं प्रयुक्तम् अस्ति?

(क) च (ख) अन्वेषणम् (ग) अवगम्य (घ) कुर्याम

**खण्डः - 'ख' (रचनात्मक-कार्यम्) 15 अङ्काः**

2. प्रधानाचार्यं प्रति लिखितम् इदं पत्रं पञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा पुनः लिखत। (½×10=5)

प्रधानाचार्याः महोदयाः,

डी.ए.वी. विद्यालयः,

दिल्लीनगरम्

दिनाङ्कः - 15/04/2024

विषयः - संस्कृतसम्भाषणशिविरस्य आयोजनार्थं प्रार्थनापत्रम्।

महोदयाः !

सविनयं निवेदनम् अस्ति यत् अहं प्रसूनः शर्मा भवतां (i) __________ अष्टम्यां कक्षायाम् अध्ययनं करोमि। संस्कृतविषये मम अतीव (ii) __________ अस्ति। मम कक्षायां प्रतिसप्ताहम् एकस्मिन् कालांशे (iii) __________ छात्राः संस्कृतेन वार्तालापं कुर्वन्ति। अनेन संस्कृतसम्भाषणस्य अभ्यासः तु भवति परं वयं धाराप्रवाहेण वक्तुं समर्थाः न (iv) __________। अतः मम निवेदनम् अस्ति यत् विद्यालये संस्कृतसम्भाषण-शिविरस्य (v) __________ भवेत्। अनेन सर्वे छात्राः संस्कृतेन सम्यक्तया (vi) __________ कर्तुं समर्थाः भविष्यन्ति। येन विद्यालये संस्कृतमयं (vii) __________ भविष्यति। अतः संस्कृतसम्भाषण-शिविरस्य आयोजनं

(viii) __________ इति मम प्रार्थना। मम (ix) __________ स्वीकृत्य अनुगृह्णन्तु भवन्तः।

(x) __________ आज्ञाकारी शिष्यः,

प्रसूनः शर्मा

कक्षा-अष्टमी

**मञ्जूषा**


| |
|---|
| सर्वे, कारयतु, विद्यालये, भवताम्, आयोजनम्, वातावरणम्, निवेदनम्, रुचिः, भवामः, वार्तालापम्। |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत–

**मञ्जूषा**

(1×5=5)

| |
|---|
| सङ्गणकयन्त्राणि, छात्राः, आसन्दाः, उत्पीठिका, घटी, शिक्षिका, व्यजनानि, टिप्पणिपुस्तिका, ध्यानेन, फलकम्, सङ्ख्या, वातानुकूलनयन्त्राणि। |




**अथवा**

'विद्यालये वृक्षसंरक्षणम्' इति विषयम् अधिकृत्य एकम् अनुच्छेदं लिखत। (1×5=5)

**मञ्जूषा**

| |
|---|
| वृक्षाः, परोपकारकाः, वाटिकायाम्, वृक्षारोपणम्, प्रत्येकं छात्रः, पादपान् सिञ्चेत्, जलेन, हानिं न कुर्यात्, आनयेत्, वर्धयेत्, संरक्षणम्, ज्ञानम्, वार्ताः, उत्तमपादपानाम्, प्रदर्शनी। |

4. अधोलिखितां कथां मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः लिखत– (½×10=5)

भगवान् बुद्धः एकस्य कृषकस्य (i) __________ स्वीकृत्य तस्य ग्रामं गतवान्। (ii) __________ तस्य प्रवचनानाम् आयोजनम् अकरोत्। यदा भगवान् बुद्धः (iii) __________ श्रावयति, तदैव कृषकस्य वृषभौ (iv) __________ अभवताम्। सः कृषकः तस्मिन् एव क्षणे प्रवचनं विहाय वृषभौ (v) __________ समीपम् (vi) __________। अन्यस्मिन् दिने ग्रामवासिनः बुद्धम् अवदन्–"सः कृषकः तु (vii) __________ अस्ति, यः (viii) __________ प्रवचनं त्यक्त्वा वृषभयोः समीपे गतवान्।" बुद्धः प्रत्यवदत्–"कृषकेण तु मया दत्ता शिक्षा (ix) __________। सः कर्मणः महत्त्वं जानाति, यदि सः न गच्छेत् तदा वृषभौ मृतौ भवेताम्। मम शिक्षा व्यर्था स्यात्।" सर्वे बुद्धस्य वचनं श्रुत्वा (x) __________ अभवन्।

**मञ्जूषा**

| |
|---|
| प्रवचनम्, नतमस्तकाः, प्रार्थनाम्, कृषकः, सार्थकीकृता, रोगग्रस्तौ, भवतः, चिकित्सकस्य, स्वार्थी, अनयत्। |

**अथवा**

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत– (1×5=5)

ईशा – किं 'क्रिकेट्' एव राष्ट्रियक्रीडा अस्ति?

शिखा – (i) ______________________________।

ईशा – तर्हि, का क्रीडा भारतस्य राष्ट्रियक्रीडा?

शिखा – (ii) ______________________________।

ईशा – किं त्वम् अपि 'हॉकी'-क्रीडां खेलसि?

शिखा – (iii) ______________________________।

ईशा – अहं तु धाविका अस्मि।

शिखा – (iv) ________________________।

ईशा – त्वम् अपि मया सह धावनार्थम् आगच्छ।

शिखा – (v) ________________________।

**मञ्जूषा**

- 'हॉकी' भारतस्य राष्ट्रियक्रीडा।
- आम्, अहं निश्चयेन धावनार्थम् आगमिष्यामि।
- नैव, क्रिकेट् राष्ट्रियक्रीडा नास्ति।
- शोभनम्। धावनं स्वास्थ्यप्रदं भवति।
- नैव, अहं 'हॉकी'-क्रीडां न क्रीडामि। तुभ्यं का क्रीडा रोचते?

## खण्डः - 'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः

5. प्रदत्तविकल्पेभ्यः अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च चित्वा लिखत– (2)

(अ) वर्णसंयोजनम् (केवलं प्रश्नैकम्) (1×1=1)

(i) म् + अ + ग् + न् + अः

(क) मग्नाः (ख) मग्नः (ग) मगनः (घ) मग्न

(ii) व् + इ + द् + य् + आ

(क) विद्या (ख) विद्य (ग) वीद्या (घ) विदया

(आ) वर्णविच्छेदः (केवलं प्रश्नैकम्) (1×1=1)

(i) पूर्णिमा

(क) प् + ऊ + र् + ण् + अ + इ + म् + आ

(ख) प् + उ + र् + ण् + इ + म् + आ

(ग) प् + ऊ + र् + ण् + ई + म् + आ

(घ) प् + ऊ + र् + ण् + इ + म् + आ

(ii) सुरभिः

(क) स् + ऊ + र् + अ + भ् + इः

(ख) स् + उ + र् + आ + भ् + इः

(ग) स् + उ + र् + अ + भ् + इः

(घ) स् + इ + र् + अ + भ् + इः

6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) सत्सङ्गतिः **मानोन्नतिं** दिशति।

(ii) प्राणिजीवनाय **स्वच्छम्+जलम्** आवश्यकं भवति।

(iii) **वृक्षायुर्वेदः** इति संस्कृतस्य ग्रन्थः अस्ति।

(iv) भवन्तः **अद्य+एव** पाठं स्मरन्तु।

7. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) __________ गङ्गायाः तटे शिष्यैः सह अतिष्ठत्।

(क) महर्षेः (ख) महर्षिः (ग) महर्षये (घ) महर्षयः

(ii) वाटिकायां मनोहराणि __________ विकसन्ति।

(क) पुष्पाय (ख) पुष्पम् (ग) पुष्पाणि (घ) पुष्पे

(iii) कलाममहोदयः __________ पूर्वराष्ट्रपतिः आसीत्।

(क) अस्माकम् (ख) अहम् (ग) मया (घ) माम्

(iv) एतस्मिन् आश्रमे अनेके __________ सन्ति।

(क) साधुः (ख) साधू (ग) साधुना (घ) साधवः

8. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) कार्यशालायां __________ अध्यापकाः अध्यापिकाः च आसन्। (85)

(क) पञ्चसप्ततिः (ख) सप्ताशीतिः (ग) पञ्चाशीतिः (घ) अष्टपञ्चाशत्

(ii) आम्रवृक्षे __________ चटके कूजतः। (2)

(क) त्रयः (ख) द्वौ (ग) द्वि (घ) द्वे

(iii) अस्मिन् कार्यालये __________ जनाः कार्यं कुर्वन्ति। (30)

(क) अष्टत्रिंशत् (ख) नवत्रिंशत् (ग) त्रिंशत् (घ) विंशतिः

(iv) कक्षायां संस्कृतस्य __________ छात्राः सन्ति। (42)

(क) द्विचत्वारिंशत् (ख) चत्वारिंशत् (ग) पञ्चचत्वारिंशत् (घ) चतुर्विंशतिः

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– (केवलं प्रश्नचतुष्टयम्) (1×4=4)

(i) माता **पुत्रे** स्निह्यति।

(ii) **भूमेः** अधः जलम् अस्ति।

(iii) शिष्यः **गुरुणा** सह आश्रमे वसति।

(iv) **नदीम्** उभयतः नौकाः सन्ति।

(v) अहं प्रातःकाले **सूर्यं** नमामि।

10. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा वाक्यानि पूरयत– (1×3=3)
(केवलं प्रश्नत्रयम्)

(i) मूषकाः परस्परं वार्तालापं ___________।

(क) कुर्वन्ति (ख) कुरुतः (ग) करोषि (घ) करोति

(ii) शिष्याः चकिताः ___________।

(क) अभवताम् (ख) अभवम् (ग) अभवन् (घ) अभवत्

(iii) यूयं मिलित्वा ___________।

(क) पठेयुः (ख) पठेत (ग) पठेम (घ) पठेत्

(iv) शिष्याः गुरुं ___________।

(क) सेवते (ख) सेवसे (ग) सेवे (घ) सेवन्ते

11. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत–
(केवलं प्रश्नत्रयम्) (1×3=3)

(i) मूषकाः प्रतिदिनं शृगालं **सेवितुं** तत्र आगच्छन्ति स्म।

(ii) यात्री महर्षेः समीपम् **आ + गम् + ल्यप्** कटुवचनानि वदति स्म।

(iii) नद्याः जलं **पीत्वा** सर्वे जीवन्ति।

(iv) वयम् अधुना **भ्रम् + तुमुन्** उद्यानं गच्छामः।

12. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत <u>पूर्णं च वाक्यं</u> लिखत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) लौकिकसंस्कृतस्य आरम्भः __________ अभवत्?

(ii) अहम् __________ विद्यालयं न गमिष्यामि।

(iii) महर्षिः दयानन्दः __________ वेदप्रचारम् अकरोत्।

**मञ्जूषा** – | श्वः, सर्वत्र, कदा |

13. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत– (1×2=2)
(केवलं प्रश्नद्वयम्)

(i) मूषकराजः कूर्दित्वा शृगालं **<u>प्र+हरति</u>**।

(ii) वयं क्रीडित्वा **<u>आगच्छामः</u>**।

(iii) **<u>वि + शुद्धं</u>** जलम् एव प्राणिनां जीवनम् अस्ति।

## खण्डः - 'घ' (पठित-अवबोधनम्) 30 अङ्काः

14. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत। (5)

एकदा सः काशीनगरे गङ्गायाः तटे एकस्मिन् कुटीरे शिष्यैः सह अतिष्ठत्। तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्। ईर्ष्यया सः यात्री महर्षेः कुटीरम् आगत्य अकारणम् एव महर्षिं दुर्वचनानि वदति स्म। जितेन्द्रियः महर्षिः सर्वं श्रुत्वा शान्तचित्तेन एव तिष्ठति स्म। सः कदापि न प्रत्युदतरत्। शिष्याः क्रुद्धाः अभवन्। महर्षिः तान् 'चिन्तां मा कुरुत, तूष्णीं भवत' इति अकथयत्। महर्षिः कथयति स्म यत् सः स्वयम् एव एकस्मिन् दिने सरलः भविष्यति। एकदा एकः जनः प्रचुराणि फलानि तत्र आनयत्। महर्षिः दयानन्दः कानिचित् मधुराणि रसयुक्तानि फलानि वस्त्रे बद्ध्वा तस्मै यात्रिणे दातुं स्वशिष्यं प्रेषितवान्।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½×2=1)

(i) तत्र समीपम् एव कः अतिष्ठत्?

(ii) के क्रुद्धाः अभवन्?

(iii) कीदृशः महर्षिः सर्वं श्रुत्वा शान्तचित्तेन एव तिष्ठति स्म?

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) महर्षिः दयानन्दः स्वशिष्यं किमर्थं प्रेषितवान्?

(ii) महर्षिः शिष्यान् किं कथयति स्म?

(iii) महर्षिः शिष्यैः सह कुत्र अतिष्ठत्?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) 'प्रसन्नाः' अस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) क्रुद्धाः (ख) तूष्णीम्

(ग) दुर्वचनानि (घ) ईर्ष्यया

(ii) 'सः एकस्मिन् दिने सरलः भविष्यति।' अस्मिन् वाक्ये 'दिने' इति पदस्य विशेषणपदं किम् अस्ति?

(क) सः (ख) एकस्मिन्

(ग) सरलः (घ) भविष्यति

(iii) अधोलिखितेषु पदेषु किं पदं क्रियापदं नास्ति?

(क) भवत (ख) कुरुत

(ग) मा (घ) अकथयत्

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात्पथः प्रविचलन्ति पदं न धीराः ॥

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½×2=1)

(i) के निन्दन्तु स्तुवन्तु वा?

(ii) धीराः कुतः पदं न प्रविचलन्ति?

(iii) युगान्तरे अद्यैव वा किम् अस्तु?

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) के न्यायात् पथः पदं न प्रविचलन्ति?

(ii) का समाविशतु गच्छतु वा यथेष्टम्?

(iii) धीराः मरणविषये किं चिन्तयन्ति?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) श्लोके 'गच्छतु' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(क) धीराः (ख) लक्ष्मीः

(ग) नीतिनिपुणाः (घ) यथेष्टम्

(ii) 'धैर्यवन्तः' इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम् ?

(क) धीराः (ख) निन्दन्तु

(ग) नीतिनिपुणाः (घ) युगान्तरे

(iii) 'अद्यैव वा मरणमस्तु युगान्तरे वा' अस्मिन् वाक्ये क्रियापदं किम्?

(क) अद्यैव (ख) वा

(ग) अस्तु (घ) मरणम्

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

अष्टमी कक्षा। संस्कृतस्य कक्षा। सर्वे छात्राः कक्षायां परस्परं चर्चायां मग्नाः सन्ति। श्यामपट्टे एका सूक्तिः लिखिता अस्ति।

**"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।"**

(तदैव मान्यवरः संस्कृतस्य अध्यापकः कक्षां प्रविशति।)

सर्वे छात्राः – (उत्थाय) वयं प्रणमामः मान्यवर!

आचार्यः – सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।

(सर्वे उपविशन्ति। जिज्ञासया आचार्यं पश्यन्ति।)

आचार्यः – (सर्वान् दृष्ट्वा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे – (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः – अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्तः पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½×2=1)

(i) कः कक्षां प्रविशति?

(ii) सूक्तिः कुत्र लिखिता अस्ति?

(iii) छात्राः जिज्ञासया कं पश्यन्ति?

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) के चर्चायां मग्नाः सन्ति?

(ii) सर्वे छात्राः कस्य विषये ज्ञातुम् इच्छन्ति?

(iii) आचार्यः सर्वान् दृष्ट्वा किं पृच्छति?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) 'इयम्' इति पदस्य किं विशेष्यपदं संवादे अस्ति?

(क) सुखिनः (ख) सूक्तिः

(ग) सर्वान् (घ) एतदर्थम्

(ii) 'तिष्ठन्ति' अस्य पदस्य किं पर्यायपदं संवादे प्रयुक्तम् ?

(क) उपविशन्ति (ख) तिष्ठन्तु

(ग) पश्यन्ति (घ) उत्थाय

(iii) 'प्रविशति' इति पदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(क) सूक्तिः (ख) छात्रः

(ग) अध्यापकः (घ) अहम्

17. मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा पूर्णम् अन्वयं लिखत–(1×4=4)

वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य, सफलं तस्य जीवितम् ॥

**अन्वयः**– यस्य (i) __________ रसवती, यस्य क्रिया (ii) __________, यस्य (iii) __________ दानवती (अस्ति), तस्य जीवितं (iv) __________ भवति।

**मञ्जूषा**

| लक्ष्मीः, श्रमवती, सफलम्, वाणी । |
|---|

**अथवा**

मञ्जूषातः समुचितपदानि चित्वा अधोलिखितसूक्तेः भावार्थं पूरयित्वा लिखत–

**सूक्तिः** – मा भ्राता भ्रातरं द्विक्षत्।

**भावार्थः**– (i) __________ भ्रातृभावः भवेत् न तु (ii) __________, केनापि सह (iii) __________ मा कुरुत। (iv) __________ मिलित्वा वसेयुः।

**मञ्जूषा**

| द्वेषः, परस्परम्, जनेषु, ईर्ष्याम् । |
|---|

18. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत। (केवलं प्रश्नचतुष्टयम्) (1×4=4)

(क) <u>**नद्याः**</u> जलं प्रदूषितं न करणीयम्।

(ख) कालिदासेन <u>**त्रीणि**</u> नाटकानि रचितानि।

(ग) <u>**क्रोधेन**</u> कार्यं न सिध्यति।

(घ) <u>**मूषकाः**</u> बिलं प्रविशन्ति।

(ङ) चटका <u>**काकं**</u> कथयति।

19. मञ्जूषायां प्रदत्तपदेभ्यः समुचितपदं चित्वा अधोलिखितकथां पूरयत– (½×6=3)

एकस्मिन् __________ एकः काकः एका चटका च द्वे मित्रे अवसताम्। एकदा तौ एकं सुन्दरं गृहं दृष्ट्वा अचिन्तयताम्–आवाम् अपि एतादृशं सुन्दरं __________ रचयिष्यावः। काकः वृक्षे मृत्तिकया सुन्दरं गृहम् अरचयत्। चटका च __________ स्वगृहं रचितवती। ग्रीष्मकाले चटकायाः गृहं नष्टम् __________। अतः सा दुःखिता अभवत्। परन्तु

__________ गृहं नष्टं न अभवत् यतः तत् मृत्तिकायाः आसीत्। खिन्ना चटका सहायतार्थं काकस्य समीपम् अगच्छत् परं काकः अभिमानी आसीत्। सः तस्याः सहायतां न अकरोत् अपितु __________ अवदत्।

**मञ्जूषा** – | तृणैः, गृहम्, वने, कटुवचनानि, काकस्य, अभवत् |

20. अधोलिखितानां पदानां समुचितार्थान् मञ्जूषातः चित्वा समक्षं लिखत– (1×4=4)

(i) वसुन्धरायाः

(ii) प्रणेता

(iii) सहजरूपेण

(iv) नत्वा

**मञ्जूषा**

| सरलतया, प्रणम्य, भूमेः, रचयिता |